॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## अच्युताष्टकम्

ॐ नमो भगवते वासुदेवाय

श्रीमद्भागवत रसिक कुटुंब

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# अच्युताष्टकम्

## अथ अच्युताष्टकम्

अच्युतं(ङ्) केशवं(म्) रामनारायणं(ङ्),
कृष्णदामोदरं(म्) वासुदेवं(म्) हरिम्।
श्रीधरं(म्) माधवं(ङ्) गोपिकावल्लभं(ञ्),
जानकीनायकं(म्) रामचन्द्रं(म्) भजे ॥ 1 ॥

अच्युतं(ङ्) केशवं(म्) सत्यभामाधवं(म्),
माधवं(म्) श्रीधरं(म्) राधिकाराधितम्।
इन्दिरामन्दिरं(ञ्) चेतसा सुन्दरं(न्),
देवकीनन्दनं(न्) नन्दनं(म्) सन्दधे ॥ 2 ॥

विष्णवे जिष्णवे शंखिने चक्रिणे,
रुक्मिणीरागिणे जानकीजानये।
वल्लवीवल्लभाया र्चितायात्मने,
कंसविध्वंसिने वंशिने ते नमः ॥ 3 ॥

कृष्ण गोविन्द हे राम नारायण,
श्रीपते वासुदेवाजित श्रीनिधे।
अच्युतानन्त हे माधवाधोक्षज,
द्वारकानायक द्रौपदीरक्षक ॥ 4 ॥

राक्षसक्षोभितः(स्) सीतया शोभितो,
दण्डकारण्यभूपुण्यताकारणः।
लक्ष्मणेनान्वितो वानरैः(स्) सेवितोऽ-
गस्त्यसम्पूजितो राघवः(फ्) पातु माम् ॥ 5 ॥

धेनुकारिष्टका  निष्टकृद्द्वेषिणां,
केशिहा कंसहृद्वंशिकावादकः।
पूतनाकोपकः(स्) सूरजाखेलनो,
बालगोपालकः(फ्) पातु मां सर्वदा ॥ 6 ॥

विद्युदुद्योतवत्प्रस्फुरद्वाससं(म्),
प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम्।
वन्यया मालया शोभितोरःस्थलं(म्),
लोहितांघ्रिद्वयं(म्) वारिजाक्षं(म्) भजे ॥ 7 ॥

कुंचितैः(ख्) कुन्तलैर्भ्राजमानाननं(म्),
रत्नमौलिं(म्) लसत्कुण्डलं(ङ्) गण्डयोः।
हारकेयूरकं(ङ्) कंकणप्रोज्ज्वलं(ङ्),
किंकिणीमंजुलं(म्), श्यामलं(न्) तं(म्) भजे ॥ 8 ॥

अच्युतस्याष्टकं(म्) यः(फ्) पठेदिष्टदं(म्),
प्रेमतः(फ्) प्रत्यहं(म्) पूरुषः(स्) सस्पृहम्।
वृत्ततः(स्) सुन्दरं(ङ्) कर्तृ विश्वम्भरस्-
तस्य वश्यो हरिर्जायते सत्वरम् ॥ 9 ॥

इति श्रीमच्छंकराचार्य विरचितमच्युताष्टकं सम्पूर्णम्